# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (ध्वनिवर्गः)** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – व्यक्तिविवेकः प्रथमो विमर्शः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।**

१ कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यमुच्यते ।

२ तत्राद्यं प्रख्यातरामरावणादिनायकप्रतिनायकसमाश्रयेण
प्रसिद्धविधिनिषेधास्पदचरितवर्णमात्रात्मकम् ।

३ अर्थस्य विशिष्टत्वं शब्दः सविशेषणस्तदः पुंस्त्वम् ।
द्विवचनवाशब्दौ च व्यक्तिर्ध्वनिनाम काव्यवैशिष्ट्यम् ॥

४ तदा चातिप्रसङ्गः स्यात् संज्ञायां यस्य कस्यचित् ।
यद्वाक्यवर्त्तिनोऽन्यस्य विशेषस्य तदाप्तितः ॥

**प्रश्नः** २ ध्वनिलक्षणस्य द्विवचनखण्डनं यथाधीतं वर्णयत ।

**प्रश्नः** ३ काव्यस्य विशिष्टत्वखण्डनं विवेचयत ।

**प्रश्नः** ४ ध्वनिलक्षणे दशदोषाणां निरूपणं कुरुत ।

**प्रश्नः** ५ लक्षणायाः शब्दशक्तित्वखण्डनं यथाग्रन्थं चर्चयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ मुख्यवृत्तिपरित्यागो न शब्दस्योपपद्यते ।
विहितोऽर्थान्तरे ह्यर्थः स्वसाम्यमनुमापयेत् ॥

२ गुणवृत्तौ गिरां यावत् सामग्रीष्टा निबन्धनम् ।
सैव लिङ्गतयास्माभिरिष्यतेऽर्थान्तरं प्रति ॥

३ यदि काव्ये गुणभूतव्यङ्ग्येऽपीष्टैव चारुता ।
प्रकर्षशालिनी तर्हि व्यर्थ एवादरो ध्वनौ ॥

४ अथेष्यते स तत्रापि रसादिव्यक्त्यपेक्षया ।
काव्यमेवान्यथा न स्याद् रसात्मकमिदं यतः ॥

**प्रश्नः ७** वक्रोक्तिखण्डनं सविस्तरं प्रतिपादयत ।

**प्रश्नः ८** विभावानुभाव-व्यभिचारिभावाः ग्रन्थोक्तदिशा विवेचयत ।

**प्रश्नः ९** गुणीभूतव्यङ्ग्यस्य निरूपणं कुरुत ।

**प्रश्नः १०** शब्दशक्तिमूलानुरणन-व्यङ्ग्यखण्डनं लिखत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ व्यक्तिविवेकस्य कर्ता कः ?
२ व्यक्तिविवेके कति विमर्शाः सन्ति ?
३ ग्रन्थोऽयं कति भागैः विभक्तः ?
४ प्रथमविमर्शस्य नाम किम् ?
५ महिमभट्टानुसारं काव्यं कतिविधम् ?
६ प्रथमविमर्शे कति कारिकाः सन्ति ?
७ 'काव्यस्य आत्मा ध्वनिः' इति कस्य मतम् ?
८ ध्वनिलक्षणे द्विवचनसमर्थनं केन कृतम् ?
९ प्रतीयमानार्थस्य कति भेदाः सन्ति ?
१० 'सूरिभिः कथितः' पदेऽस्मिन् कः दोषः ?
११ ध्वनिलक्षणे कति दोषाः प्रतिपादिताः ?
१२ शब्दशक्तयः कति सन्ति ?
१३ व्यङ्ग्यार्थे का शक्तिः ज्ञेया ?
१४ गुणवृत्तिः कतिविधा भवति ?
१५ बहिरङ्गं विशेषणं कति प्रकारकं भवति ?

****